तृतीयः पाठः

# अलसकथा

**[ अयं पाठः विद्यापतिकृतस्य कथाग्रन्थस्य पुरुषपरीक्षेतिनामकस्य अंशविशेषो वर्तते। पुरुषपरीक्षा सरलसंस्कृतभाषायां कथारूपेण विभिन्नानां मानवगुणानां महत्त्वं वर्णयति, दोषाणां च निराकरणाय शिक्षां ददाति। विद्यापतिः लोकप्रियः मैथिलीकविः आसीत्। अपि च बहूनां संस्कृतग्रन्थानां निर्मातापि विद्यापतिरासीत् इति तस्य विशिष्टता संस्कृतविषयेऽपि प्रभूता अस्ति। प्रस्तुते पाठे आलस्यनामकस्य दोषस्य निरूपणे व्यंग्यात्मिका कथा प्रस्तुता विद्यते। नीतिकाराः आलस्यं रिपुरूपं मन्यन्ते। ]**

आसीत् मिथिलायां वीरेश्वरो नाम मन्त्री। स च स्वभावाद् दानशीलः कारुणिकश्च सर्वेभ्यो दुर्गतेभ्योऽनाथेभ्यश्च प्रत्यहमिच्छाभोजनं दापयति। तन्मध्येऽलसेभ्योऽप्यन्नवस्त्रे दापयति। यतः -

**निर्गतीनां च सर्वेषामलसः प्रथमो मतः।**
**किञ्चिन्न क्षमते कर्त्तुं जाठरेणाऽपि वह्निना ॥**

ततोऽलसपुरुषाणां तत्रेष्टलाभं श्रुत्वा बहवस्तुन्दपरिमृजास्तत्र वर्त्तुलीबभूवुः यतः -

**स्थितिः सौकर्यमूला हि सर्वेषामपि संहते।**
**सजातीनां सुखं दृष्ट्वा के न धावन्ति जन्तवः ॥**

पश्चादलसानां सुखं दृष्ट्वा धूर्ता अपि कृत्रिममालस्यं दर्शयित्वा भोज्यं गृह्णन्ति। तदनन्तरमलसशालायां बहुद्रव्यव्ययं दृष्ट्वा तन्नियोगिपुरुषैः परामृष्टम् - यदक्षमबुद्ध्या करुणया केवलमलसेभ्यः स्वामी वस्तूनि दापयति, कपटेनाऽनलसा अपि गृह्णन्ति इत्यस्माकं प्रमादः। यदि भवति तदालसपुरुषाणां परीक्षां कुर्मः इति परामृश्य प्रसुप्तेषु अलसशालायां तन्नियोगिपुरुषाः वह्निं दापयित्वा निरूपयामासुः।

ततो गृहलग्नं प्रवृद्धमग्निं दृष्ट्वा धूर्ताः सर्वे पलायिताः। पश्चादीषदलसा अपि पलायिताः। चत्वारः पुरुषास्तत्रैव सुप्ताः परस्परमालपन्ति। एकेन वस्त्रावृतमुखेनोक्तम्- अहो कथमयं कोलाहलः? द्वितीयेनोक्तम् - तर्क्यते यदस्मिन् गृहे अग्निर्लग्नोऽस्ति। तृतीयेनोक्तम् - कोऽपि तथा धार्मिको नास्ति

य इदानीं जलार्द्रैर्वासोभिः कटैर्वास्मान् प्रावृणोति ? चतुर्थेनोक्तम् - अये वाचालाः। कति वचनानि वक्तुं शक्नुथ ? तूष्णीं कथं न तिष्ठथ ?

ततश्चतुर्णामपि तेषामेवं परस्परालापं श्रुत्वा वह्निं च प्रवृद्धमेषामुपरि पतिष्यन्तं दृष्ट्वा नियोगिपुरुषैर्वधभयेन चत्वारोऽप्यलसाः केशेष्वावाकृष्य गृहीत्वा गृहाद् बहिःकृताः। पश्चात्तानालोक्य तैर्नियोगिभिः पठितम्-

**पतिरेव गतिः स्त्रीणां बालानां जननी गतिः ।**
**नालसानां गतिः काचिल्लोके कारुणिकं बिना ॥**

पश्चात्तेषु चतुर्ष्वलसेषु ततोऽप्यधिकतरं वस्तु मन्त्री दापयामास ।

## शब्दार्थाः

| | | |
|---|---|---|
| अलसः | अकर्मण्यः | आलसी |
| कारुणिकः | दयालुः | दयावान |
| दुर्गतेभ्यः | निर्धनेभ्यः | संकटगस्तों को |
| प्रत्यहम् | प्रतिदिनम् | प्रतिदिन |
| रिपुः | अरिः | शत्रु |
| जाठरेण | उदरसम्बद्धेन | उदर से सम्बद्ध |
| तुन्दपरिमृजाः | उदरवर्धकाः | तोंद बढ़ाने वाले |
| सौकर्यमूला | सौविध्यमूला | सुविधाजनक |
| सजातीनाम् | स्वजातीनाम् | अपनी जातियों का |
| कृत्रिममालस्यम् | स्वनिर्मितम् आलस्यम् | बनावटी आलस्य |
| बहुद्रव्यव्ययम् | अधिकधनव्ययः | अधिक धन का खर्च |
| परामृष्टम् | विचारितम् | विचार किया गया |
| बुद्ध्या | मत्या | बुद्धि से |
| प्रमादः | आलस्यम् | आलस्य |

| | | | | |
|---|---|---|---|---|
| परामृश्य | - | विचार्य | - | विचार करके |
| प्रसुप्तः | - | सुप्तः | - | सोया हुआ |
| वह्निम् | - | अग्निम् | - | अग्नि को, आग |
| दापयति | - | दानं कारयति | - | दिलवाता है |
| गृहलग्नम् | - | गेहलिप्तम् | - | घर में लगी |
| प्रवृद्धम् | - | प्रवर्द्धमानम् | - | फैली हुई, बढ़ी हुई |
| ईषत् | - | स्तोकम् | - | थोड़ा |
| जलार्द्रैः | - | नीरेण आर्द्रैः | - | जल से आर्द्र |
| कटैः | - | आस्तरैः | - | चटाई, आसनों से |
| प्रावृणोति | - | आच्छादयति | - | ढँकता है |
| तूष्णीम् | - | मौनम् | - | मौन |
| आलापम् | - | वार्त्ताम् | - | बातचीत |
| आकृष्य | - | समीपम् आनीय | - | खींच करके |
| आलोक्य | - | दृष्ट्वा | - | देखकर |

## सन्धिविच्छेदः

| | | |
|---|---|---|
| विद्यापतिरासीत् | - | विद्यापतिः + आसीत् |
| व्यंग्यात्मिका | - | व्यंग्य + आत्मिका |
| दुर्गतेभ्योऽनाथेभ्यश्च | - | दुर्गतेभ्यः + अनाथेभ्यः + च |
| प्रत्यहमिच्छाभोजनम् | - | प्रत्यहम् + इच्छाभोजनम् |
| अलसेभ्योऽप्यन्नवस्त्रे | - | अलसेभ्यः + अपि + अन्नवस्त्रे |
| जाठरेणाऽपि | - | जाठरेण + अपि |
| ततोऽलसपुरुषाणाम् | - | ततः + अलसपुरुषाणाम् |
| पश्चादलसानाम् | - | पश्चात् + अलसानाम् |

तदनन्तरमलसशालायाम् - तदनन्तरम् + अलसशालायाम् (तत् + अनन्तरम्)
यदक्षमबुद्ध्या - यत् + अक्षमबुद्ध्या
तदालसपुरुषाणाम् - तदा + अलसपुरुषाणाम्
पश्चादीषदलसा: - पश्चात् + ईषत् + अलसा:
अग्निर्लग्नोऽस्ति - अग्नि: + लग्न: + अस्ति
तृतीयेनोक्तम् - तृतीयेन + उक्तम्
जलार्द्रैर्वासोभि: - जलार्द्रै: + वासोभि:
ततश्चतुर्णामपि - तत: + चतुर्णाम् + अपि
ततोऽप्यधिकतरम् - तत: + अपि + अधिकतरम्
कारुणिकश्च - कारुणिक: + च
तन्मध्ये - तत् + मध्ये
तन्नियोगिपुरुषै: - तत् + नियोगिपुरुषै:
किञ्चिन्न - किम् +चित् + न
काचिल्लोके - काचित् + लोके
तत्रेष्टलाभम् - तत्र + इष्टलाभम्
निर्मातापि - निर्माता + अपि

## समास:

अक्षमबुद्ध्या - अक्षम: बुद्ध्या (कर्मधारय तत्पुरुष)
मैथिलीकवि: - मैथिलीभाषाया: कवि: (षष्ठी तत्पुरुष)
नीतिकारा: - नीतिं कुर्वन्ति (उपपद समास)
पुरुषपरीक्षा - पुरुषस्य परीक्षा (षष्ठी तत्पुरुष)
मानवगुणानाम् - मानवस्य गुणानाम् (षष्ठी तत्पुरुष)
जलार्द्रै: - जलेन आर्द्रै: (तृतीया तत्पुरुष)
नियोगिपुरुषै: - नियोगिभि: पुरुषै: (कर्मधारय)
बहुद्रव्यव्ययम् - बहुद्रव्याणां व्ययम् (षष्ठी तत्पुरुष)

## अभ्यासः
## ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) इयं कथा कस्मात् ग्रन्थात् उद्धृताऽस्ति ?

(ख) अस्यां कथायां कस्य महत्त्वम् वर्णितम् अस्ति ?

(ग) अस्याः कथायाः रचनाकारः कः ?

(घ) इयं कथा किं शिक्षयति ?

(ङ) विद्यापतिः कः आसीत् ?

(च) अस्यां कथायां कस्य दोषस्य वर्णनम् अस्ति ?

(छ) मिथिलायाः मन्त्री कः आसीत् ?

(ज) कं दृष्ट्वा सर्वे धूर्ताः पलायिताः ?

(झ) अलसशालायां बहुद्रव्यव्ययं दृष्ट्वा तन्नियोगिपुरुषैः किं परामृष्टम् ?

2. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकशब्देन दत्त –**

(क) अग्निं दृष्ट्वा के पलायिताः ?

(ख) कति पुरुषाः सुप्ता आसन् ?

(ग) एकः पुरुषः किम् अवदत् ?

(घ) द्वितीयः पुरुषः किम् अवदत् ?

(ङ) तृतीयः पुरुषः किम् अवदत् ?

(च) चतुर्थः पुरुषः किम् अवदत् ?

(छ) वीरेश्वरः कः आसीत् ?

(ज) तस्य स्वभावः कीदृशः आसीत् ?

(झ) अलसानां सुखं दृष्ट्वा के कृत्रिमालस्यं दर्शयित्वा भोजनं गृह्णन्ति स्म ?

# अभ्यासः
## ( लिखितः )

1. **रिक्तस्थानानि पूरयत –**

(क) स्थितिः ...................... धावन्ति जन्तवः।

(ख) निर्गतीनां ...................... वह्निना।

(ग) कपटेनाऽनलसा अपि गृह्णन्ति इत्यस्माकं ..................।

(घ) विद्यापतिः लोकप्रियः ...................... आसीत्।

(ङ) नीतिकाराः आलस्यं ...................... मन्यन्ते।

(च) आसीत् मिथिलायां ...................... नाम मन्त्री।

(छ) पश्चादलसानां सुखं दृष्ट्वा धूर्त्ता अपि कृत्रिममालस्यं दर्शयित्वा .................. गृह्णन्ति।

2. **एकपदेन उत्तरत –**

(क) अलसकथायाः कथाकारः कः ?

(ख) वीरेश्वरो नाम मन्त्री कुत्र आसीत् ?

(ग) केषाम् इष्टलाभं कृत्वा तुन्दपरिमृजा वर्तुलीबभूवुः ?

(घ) के कृत्रिमालस्यं दर्शयित्वा भोजनं गृह्णन्ति ?

(ङ) तत्रैव कति पुरुषाः सुप्ताः ?

3. **पूर्णवाक्येन उत्तराणि दत्त –**

(क) मिथिलायां कः मन्त्री आसीत् ?

(ख) वीरेश्वरो नाम मन्त्री केभ्यः स्वरुचिभोजनं दापयति स्म ?

(ग) भीषणबुभुक्षया अपि कः किमपि कर्त्तुं न क्षमते ?

(घ) धूर्त्ताः किं दृष्ट्वा पलायनं कृतवन्तः ?

(ङ) चत्वारः अलसाः कैः बहिष्कृताः ?

(च) अलसानां कः शरणदः ?

(छ) जन्तवः केषाम् सुखं दृष्ट्वा धावन्ति ?

4. **उदाहरणम् अनुसृत्य पदनिर्माणं क्रियताम् –**

उदाहरणम् – प्रश्नः- अलस + ष्यञ् =

उत्तरम् = आलस्यम्

(क) करुण + ष्यञ् = ............................... ।

(ख) बहुल + ष्यञ् = ............................... ।

(ग) प्रधान + ष्यञ् = ............................... ।

(घ) सरल + ष्यञ् = ............................... ।

(ङ) तरुण + ष्यञ् = ............................... ।

(च) कठिन + ष्यञ् = ............................... ।

(छ) वत्सल + ष्यञ् = ............................... ।

5. **उदाहरणम् अनुसृत्य क्रियापदानि लिखत –**

उदाहरणम् – प्रश्नः – ददाति इत्यस्य प्रेरणार्थके ................ क्रियापदं भवति।

उत्तरम् – दापयति।

(क) पश्यति इत्यस्य प्रेरणार्थके ....................... क्रियापदं भवति।

(ख) करोति इत्यस्य प्रेरणार्थके ....................... क्रियापदं भवति।

(ग) खादति इत्यस्य प्रेरणार्थके ....................... क्रियापदं भवति।

(घ) पठति इत्यस्य प्रेरणार्थके ....................... क्रियापदं भवति।

(ङ) गच्छति इत्यस्य प्रेरणार्थके ....................... क्रियापदं भवति।

6. **उदाहरणम् अनुसृत्य प्रश्ननिर्माणं क्रियताम् –**

उदाहरणम् – वीरेश्वरः **कारुणिकः** मन्त्री आसीत्।

प्रश्नः – वीरेश्वरः कीदृशः मन्त्री आसीत् ?

(क) धूर्ताः कृत्रिमालस्यं दर्शयित्वा **भोजनम्** प्राप्नुवन्ति।

(ख) निर्गतीनां प्रथमः **अलसः** अस्ति।

(ग) **अलसः** जाठरेणाऽपि वह्निना किमपि कर्तुं न क्षमते।

(घ) नियोगिपुरुषाः **अलसशालायां** वह्निं दापयित्वा निरूपयामासुः।

(ङ) **स्त्रीणां** गतिः पतिरेव।

(च) **बालानां** गतिः जननी।

(छ) कारुणिकः **अलसानां** गतिः।

## योग्यताविस्तारः

अस्य पाठस्य अयं सन्देशः अस्ति यत् आलस्यं महान् रोगः अस्ति। अलसस्य सहायकः प्रायः कोऽपि नैव भवति। अतः जीवने आलस्यं सर्वथा त्याज्यम्। आलस्यस्य सम्बन्धे नीतिश्लोकः कथयति–

**आलस्यं हि मनुष्याणां, शरीरस्थो महारिपुः।**
**नास्त्युद्यमसमो बन्धुः, कृत्वा यं नावसीदति॥**

कथनस्य तात्पर्यम् अस्ति शरीरे स्थितः शत्रुः आलस्यम् अस्ति। मनुष्यशरीरे आलस्यशत्रुविनाशाय उद्यमः (परिश्रमः) नाम मित्रम् अपि अस्ति। सम्प्रति विद्यार्थी स्वयमेव चिन्तयतु। मनुष्यः यदि जीवने उन्नतिं विकासं वा इच्छति तर्हि आलस्यं त्यक्त्वा उद्यमं करोतु।

पुनः कथितम् –

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥**

## क्रियानुशीलनम् :-

(क) स्वपरिवेशे तेषां बालकानां सूची करणीया, ये अलसाः सन्ति।

(ख) परिवेशे परिश्रमशीलानां जनानां बालानां च सूची करणीया।

(ग) एका गोष्ठी करणीया, यत्र आलस्यकारणात् जायमानानां हानीनां चर्चा करणीया। पुनश्च परिश्रमबलेन एकः निर्बलः निर्धनः निर्विद्यश्च केन प्रकारेण सबलः सधनः, सविद्यश्च अभवत् इति प्रकारकं कथानकं कथनीयम्।

□